# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा -शास्त्रीप्रथमवर्षम्** (SEM-1) | **प्रश्नपत्रम् – ५**<br>(C.C.- 1.1.1. New )<br>*ग्रन्थः वास्तुमाणिक्यरत्नाकरम् /*<br>*मुहूर्तचिन्तामणिवास्तुप्रकरणम्* | **गुणाः - ७०** |
| **विषयः - वास्तुशास्त्रम्** | | |
| **दिनाङ्कः - १९/१२/२०१८** | | **समयः -२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु कयोश्चित् द्वयोः व्याख्यां कुरुत । (१०)**

*(१) श्रीशिवं त्र्यम्बकं श्रीगणेशान्वितं पार्वतीवल्लभं वै प्रणम्येश्वरम् ।*
रच्यते वास्तुमाणिक्यरत्नाकरो बालकानां हितार्थं मया यत्नतः ॥

*(२) आयो ध्वजो धूम्रहरो च कुक्कुरः गौः शीतलोवाहनको द्विपः स्मृतः ।*
काको भवेत् पिण्डगजैर्विभक्ते क्रमेण ज्ञेयः सुधिया प्रयत्नतः ॥

*(३) गृहं नाथहस्तप्रमाणेन कार्यं तथा सूनुहस्तेन भार्याकरेण ।*
*सुहृद्धस्तमानेन पुत्रप्रियायाः करेणैव सद्मं प्रकुर्य्यात्सुखार्थी ॥*

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्योपरि निनन्धं लिखतु । (१०)**

*(१) ग्रामवासविचारः ।* *(२) अवर्गादीशाः ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः ससन्दर्भं व्याख्यां करोतु । (१०)**

*(१) दीर्घविस्तारयोर्योगे वसुभिर्भागमाहरेत् ।*
*एकादिशेषेण बुधैः ज्ञेयं हि चरणीफलम् ॥*
*पशोर्व्याधिः पशोर्नाशः पशोर्लाभः पशोर्मृतिः ।*
*पशोः कष्टं पशोर्वृद्धिः पशोर्दुःखं पशोःसुखम् ॥*

*(२) ध्रुवे क्षिप्रे श्रवे पौष्णे वासवेऽर्के गुरौ शनौ ।*
*इष्टिकारंभणे श्रेष्ठं भित्तिलेपेऽपि शोभनम् ॥*

*(३) तुरङ्गशाला गेहस्य वामभागे शुभा सदा ।*
*चतुः षष्टिकराभव्या शतार्धं मध्यमा तथा ॥*
*व्योमवेदकरा शाला कनिष्ठातु सदा बुधैः ।*
*तिथिकामशिवैर्हस्तैर्विस्तारः क्रमशः स्मृतः ॥*

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत । (१०)**

*(१) वास्त्वर्चनपद्धतिः ।*

*(२) गृहप्रवेशे कुम्भचक्रमाह ।*

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः ससन्दर्भं व्याख्यां कुरुत । (१०)**

(१) *यद्भं द्वयङ्कसुतेशदिङ्मितमसौ ग्रामः शुभो नामभात् ।*
*स्वं वर्गं द्विगुणं विधाय परवर्गाढ्यं गजैः शेषितम् ॥*
*काकिण्यस्त्वनयोश्च तद्विवरतो यस्याधिकाः सोऽर्थदो-*
*ऽथद्वारं द्विजवैश्यशूद्रनृपराशीनां हितं पूर्वतः ॥*

(२) *ध्रुवधान्ये जयानन्दौ खरकान्तमनोरमं सुमुखदुर्मुखोग्रश्च ।*
*रिपुदंवित्तदंनाशं चाक्रन्दं विपुलविजयाख्यं स्यात् ॥*

(३) *देवालये गेहविधौ जालशये राहोर्मुखं शम्भुदिशो विलोमतः ।*
*मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात् पृष्ठविदिकशुभा भवेत् ॥*

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । (१०)**

(१) *दिशासु गृहविभागाः ।*

(२) *वास्तुप्रकरणस्य मुहूर्तचिंतामणिदृशा विवर्णनं करोतु ।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । (१०)**

(१) *गृहे देवस्थानं कस्मिन् कोणे भवति ।*

(२) *गृहे पाकशालागृहं कस्मिन् कोणे भवति ?*

(३) *भण्डारगृहं कुत्र भवति ?*

(४) *द्वारचक्रनिर्माणे सूर्यनक्षत्रात् प्रथमचत्वारिनक्षत्राणि शुभानि न वा ?*

(५) *मृदुनक्षत्राणि कानि ?*

(६) *वास्तुभूमौ गृहस्यमध्ये कूपनिर्माणं क्रियते चेत् फलं किम् ?*

(७) *शुक्लपक्षे गृहारम्भफलं किम् ?*

(८) *गृहनिर्माणे कः वारः वर्ज्यः वर्तते ?*

(९) *गृहनिर्माणे वर्ज्याः तिथयः के ?*

(१०) *पूर्णिमातः कृष्णाष्टमीपर्यन्तं निर्मितपूर्वद्वारस्य गृहं शुभं न वा ?*

(११) *कृष्णपक्षे गृहारम्भं क्रियते चेत् फलं किम् ?*

(१२) *चैत्रे मेषस्य सूर्यः भवति चेत् गुहारम्भस्य फलं किम् ?*

(१३) *गृहारम्भः रात्रौ क्रियते न वा ?*

(१४) *के राशिजनाः ग्रामस्य मध्ये न निवसेयुः ?*

(१५) *अ वर्गस्य दिशा काः ?*

--oo--